योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः ४६

षट्चत्वारिंशः सर्गः ४६

श्रीवसिष्ठ उवाच ।

रम्ये धनेषु दारादौ शोकस्यावसरो हि कः ।

इन्द्रजालेक्षणादृष्टे नष्टे का परिदेवना ।। १

गन्धर्वनगरस्यार्थे दूषिते भूषिते तथा ।

अविद्यांशे सुतादौ वा कः क्रमः सुखदुःखयोः ।। २

रम्ये धनेऽथ दारादौ हर्षस्यावसरो हि कः ।

वृद्धायां मृगतृष्णायां किमानन्दो जलार्थिनाम् ।। ३

धनदारेषु वृद्धेषु दुःखं युक्तं न तुष्टयः ।

वृद्धायां मोहमायायां कः समाश्वासवानिह ।। ४

यैरेव जायते रागो मूर्खस्याधिकतागतैः ।

तैरेव भोगैः प्राज्ञस्य विराग उपजायते ।।५

नष्टे धनेऽथ दारादौ हर्षस्यावसरो हि कः ।

पारावलोकिनस्त्वेतैर्विरागं यान्ति साधवः ।। ६

अतो राघव तत्त्वज्ञो व्यवहारेषु संसृतेः ।

नष्टं नष्टमुपेक्षस्व प्राप्तं प्राप्तमुपाहर ।। ७

अनागतानां भोगानामवाञ्छनमकृत्रिमम् ।

आगतानां च संभोग इति पण्डितलक्षणम् ।। ८

संसारसंभ्रमे ह्यस्मिंश्छन्नात्मन्याततायिनि ।

तथा विहर संबुद्धो यथा नायासि मूढताम् ।। ९

संसाराडम्बरस्यास्य प्रपञ्चरहिते क्रमे ।

सम्यग्ज्ञा नानुपश्यन्ति ये हतास्ते कुबुद्धयः ।। १०

यया कयाचिद्युक्त्यैव दृश्याद्यस्य गता रतिः ।

परिमज्जति तस्यास्था न क्वचिद्विमला मतिः ।। ११

यस्यासदिदमित्यास्था निवृत्ता सर्ववस्तुषु ।

क्रोडीकरोति सर्वज्ञं नाविद्या तमवास्तवी ।। १२

अहं जगच्चैकमिदं सर्वमेवेति यस्य धीः ।

आस्थानास्थे परित्यज्य संस्थिता स न मज्जति ।। १३

शुद्धं सदसतोर्मध्यं पदं बुद्ध्वाऽवलम्ब्य च ।

सबाह्याभ्यन्तरं दृश्यं मा गृहाण विमुञ्च मा ।। १४

अत्यन्तविरतः स्वस्थः सर्ववासविवर्जितः ।

व्योमवत्तिष्ठ नीरागो राम कार्यपरोऽपि सन् ।। १५

यस्य नेच्छा न वानिच्छा ज्ञस्य कर्मणि तिष्ठतः ।

न तस्य लिप्यते प्रज्ञा पद्मपत्रमिवाम्बुभिः ।। १६

दर्शनस्पर्शनादीनि मा करोतु करोतु च ।

तवेन्द्रियमनो गौणं त्वमनिच्छो भवात्मवान् ।। १७

ममेदमित्यसद्भूतमिन्द्रियार्थे भवन्मनः ।

मा निमज्जत्वमग्नः सन्मा करोतु करोतु वा ।। १८

यदा ते नेन्द्रियार्थश्रीः स्वदते हृदि राघव ।

तदा विज्ञातविज्ञानः समुत्तीर्णभवार्णवः ।। १९

आस्वादितेन्द्रियार्थस्य सतनोरतनोरपि ।

अनिच्छतोऽपि संपन्ना मुक्तिरर्थवशात्तव ।। २०

उच्चैःपदाय परया प्रज्ञया वासनागणात् ।

पुष्पाद्गन्धमिवोदारं चेतो राम पृथक्कुरु ।। २१

संसाराम्बुनिधावस्मिन्वासनाम्बुपरिप्लुते ।

ये प्रज्ञा नावमारूढास्ते तीर्णा वुडिताः परे ।। २२

क्षुरधाराप्रमितया धिया परमधीरया ।

प्रविचार्यात्मनस्तत्त्वं ततः स्वपदमाविश ।। २३

यथा तत्त्वविदः प्राज्ञा ज्ञानबृंहितचेतसः ।

विहरन्ति तथा राम विहर्तव्यं न मूढवत् ।। २४

जीवन्मुक्ता महात्मानो नित्यतृप्ता महाधियः ।

आचारैरनुगन्तव्या न भोगकृपणाः शठाः ।। २५

न त्यजन्ति न वाञ्छन्ति व्यवहारं जगद्गतम् ।

सर्वमेवानुवर्तन्ते पारावारविदो जनाः ।। २६

प्रभावस्याभिमानस्य गुणानां यशसः श्रियः ।

न क्वचित्कृपणा लोके महान्तस्तत्त्वदर्शिनः ।। २७

सुशून्येऽपि न खिद्यन्ते देवोद्याने नसङ्गिनः ।

नियतिं च न मुञ्चन्ति महान्तो भास्करा इव ।। २८

विगतेच्छा यथाप्राप्तव्यवहारानुवर्तिनः ।

विचरन्ति समुन्नद्धाः स्वस्था देहरथे स्थिताः ।। २९

त्वमपि प्राप्तवान् राम विवेकमिममाततम् ।

प्रज्ञाबलेन चानेन ज्ञाने स्वस्थोऽसि सुन्दर ।। ३०

स्पष्टां दृष्टिमवष्टभ्य निर्मानो गतमत्सरः ।

विहरास्मिन्भुवः पीठे परां सिद्धिमवाप्स्यसि ।। ३१

स्वस्थः सर्वेहितत्यागी दूरालोकनवाञ्छनः ।

परां शीतलतामन्तरादाय विहरानघ ।। ३२

श्रीवाल्मीकिरुवाच ।

इत्थं गिरा विमलया विमलाशयस्य

रामो मुनेः सपदि मृष्ट इवाबभासे ।

ज्ञानामृतेन मधुरेण विराजितान्तः

पूर्णः शशाङ्क इव शीतलतां जगाम ।। ३३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मोक्षोपायेषु स्थितिप्रकरणे जीवन्मुक्तस्थितगुणवर्णनं नाम षट्चत्वारिंशः

सर्गः ॥ ४६ ॥